प्यधूमवत्वाद्वह्निमान्पर्व
त इत्याकारकमिति॥=४॥
तस्मात् ...

रे विध्यं व्युत्पादयति अन्वयेति॥ अन्वयश्च व्यतिरेकश्च तौ
अन्वयव्यतिरेकौ॥ तौ विद्येते यस्मिन् तत् अन्वयव्यति
रेकि॥ यत्सत्त्वे यत्सत्त्वमन्वयः॥ यदभावे यदभावो व्य॥
तिरेकः॥ केवलो अन्वयो यस्मिन् तत् केवलान्वयि॥ केव
लो व्यतिरेको यस्मिन् तत् केवलव्यतिरेकीति विभागः॥ १
तत्रान्वयव्यतिरेकिणं दर्शयति॥ अन्वयेनेति॥ तृतीयाया
निरूपितत्वमर्थः॥ तस्य च व्याप्तावन्वयः॥ अन्वयनिरूपि
तव्याप्तिमत्वे सति व्यतिरेकनिरूपितव्याप्तिमत् यल्लिंगं
तदन्वयव्यतिरेकीति लक्षणं॥ उदाहरति यथेति॥ विशे

षणमात्रेणौ केवलान्वयव्यतिव्याप्ति
लघारणपविशेष्यदलं॥ तन्मात्रे क्षौ के
वलव्यतिरेकिणमंतिव्याप्तिलद्वारणाय
विशेषणेति॥ उभयत्रापि न कुत्रापि
निष्प्रयोगः॥ == २ ॥

यस्मिन्नाधिकरणे धूमस्तस्मिन् नाधिकर
णे नास्तीति अन्वयनिरूपितव्याप्तिर्धूमे तिष्ठ
मस्य व्याप्यत्वात्॥ अन्वयव्याप्तौ॥ उक्तं च॥
अन्वये साधनं व्याप्यं साध्यं व्यापकमिष्यते
साध्याभावोन्यथा व्याप्यो व्यापकः साधना
त्ययः॥ व्याप्यस्य वचनं पूर्वं व्यापकस्य ततः परं
... व्याप्तिः स्फुटीभवतीनान्यतः॥ इति वचनात्॥ व्याप्याश्रयो व्याप्य इति
विग्रहाच्च॥ वह्निनिरूपितान्वयव्याप्त्याश्रयत्वं धूमे ह्यस्तीति॥ = ॥ = ॥ ५ ॥

षयं॥ अन्वयव्यतिरेकि केवलान्व
यि केवलव्यतिरेकि चेति॥ अन्वयेन
व्यतिरेकेण व्याप्तिमदन्वयव्यति
रेकि यथा वह्नौ साध्ये धूमवत्त्वं य
त्र धूमस्तत्राग्निरित्यन्वयव्याप्तिः॥
यत्र वह्निर्नास्ति तत्र धूमो नास्ति॥
यथा महाह्रद इति व्यतिरेकव्या
प्तिः॥ अन्वयमात्रव्याप्तिकं केवला

अथ कथं व्यतिरेकनिरूपित
व्याप्तिर्धूमे इति जिज्ञासायां
माह॥ यत्रेति॥ यस्मिन्नाधिक
रणे वह्न्यभावस्तस्मिन्नाधिकर
णे धूमाभावो महाह्रदे प्रसिद्धा
व्यतिरेकनिरूपिता व्याप्तिः॥
साकथं धूमे धूमाभावनिरूपि
ता व्याप्तिर्वह्न्यभावेऽनुभूयमा
नत्वात्॥ इति चेत् स्मरणात् सा
ध्याभावव्यापकीभूताभाव
प्रतियोगित्वं धूमेऽस्तीति व्य
तिरेकव्याप्तिः॥ == ॥ ४ ॥

[illegible]

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

न.सं.
१६
16

उदाहरति॥यथेति॥घटस्याभिधाविषयः शक्यो वाच्य इति यावत्स्य माविषय त्वादित्यर्थः॥

त्वविषयश्च घटोभिधेयः प्रमेयत्वा
त्॥पटवदिति॥अत्र च प्रमेयत्वा
भिधेयत्वयोर्व्यतिरेकव्याप्तिर्ना
स्ति॥सर्वस्य प्रमेयत्वादभिधेयत्वं
च॥व्यतिरेकमात्रव्याप्तिकं केवल
व्यतिरेकि यथा पृथिवीतरेभ्यो
भिद्यते॥गंधवत्वात्॥यदितरेभ्यो
न भिद्यते न तद्गंधवत्॥यथा जलं

व्यतिरेकव्याप्तिमभिनीय दर्शयति॥यदिति॥यदितरभेदाभाववत् तद्गंधाभाववदित्यर्थः॥जलमित्यर्थः॥ = २॥

उदाहरति यथेति॥पृथिवीत्वावच्छिन्ना पृथिवीइतरेभ्यो जलादिभ्यो भिद्यते जलादिभेदवति समवायेन गंधवत्वादित्यर्थः॥

व्यतिरेकव्याप्तिरेकमात्रः तेन व्याप्तिर्यस्मिन् तत्र व्यतिरेकमात्रव्याप्तिकं यल्लिंगं तत्केवलव्यतिरेकि॥व्यतिरेकेतरनिरूपितव्याप्त्यभाववत्त्वे सति व्यतिरेकनिरूपितव्याप्तिमत् यल्लिंगं तत्केवलव्यतिरेकीत्यर्थः॥यल्लिंगं तत्केवलव्यतिरेकीत्युक्तौ सद्धेतावतिप्रसंगस्तद्वारणाय व्याप्तिमदिति॥तथापि तत्रैवातिप्रसंगस्तद्वारणाय व्यतिरेकनिरूपितेति॥तावन्मात्रोक्तावन्वयव्यतिरेकिण्यतिव्याप्तिस्तद्वारणाय विशेषणं॥विशेषणोक्तौ तत्रैवेति प्रसंगस्तद्वारणाय विशेष्यं॥उभयोक्तौ न कुत्रापि दोषः॥ = २॥

उपनयं दर्शयति न चेयमिति इयं पृथिवी तथा न इतरभेद भावव्यापकीभूतगंधाभाव व ... नेत्यर्थः ॥ = १ ॥

निगमनं दर्शयति तस्मादिति ॥ इतरभेदाभावव्यापकीभूतगंधाभावाभाववत्त्वात् न तथा इतरभेदाभाववती न किंतु इतरभेदवतीत्यर्थः ॥ = = २

दृष्टांताभावेनान्वयव्याप्त्यभावं दर्शयति अत्रेति ॥ अस्मिन्ननुमानेऽन्वये यद् गंधवत् तदितरभेदवत् यथा ... मिति ॥ अन्वये दृष्टान्ताभावः ॥ = १

न चैवं तथा ॥ तस्मान्न तथेति ॥ तत्र यद्गंधवत्तदितरभिन्नमित्यन्वयदृष्टांतो नास्ति ॥ पृथिवीमात्रस्य पक्षत्वात् ॥ संदिग्धसाध्यवान् पक्षः ॥ यथा धूमवत्त्वे हेतौ पर्वतः ॥ निश्चितसाध्यवान् सपक्षः ॥ यथा तत्रैव महानसः ॥ निश्चितसाध्याभाववान् विपक्षः ॥ यथा तत्रैव महाह्रदः ॥

पृथिवीत्वावच्छिन्नायाः सर्वस्याः पृथिव्याः पक्षत्वात् पृथिव्याः सकाशादन्यत्र कुत्रापि समवायेन गंधवत्त्वाभावः प्रसिद्ध इति भावः ॥ = ३

ननु पक्षलक्षणमित्यत्र किं नाम पक्षत्वं इति जिज्ञासायामाह संदिग्धेति ॥ संदेहविषयः संदिग्धः संदिग्धः साध्यः ॥ संदिग्धः साध्यो यस्मिन् सः संदिग्धसाध्यवान् पक्ष इत्यर्थः ॥ साध्यज्ञानं ... सपक्षे निश्चितः ... संदिग्धे ... धूमेन वह्निरिति ... साध्यवत्ता ... यतः साध्येति व्याप्तिरतः संदिग्धसाध्यवान् इति ... ॥ = ४ ॥

सपक्षमुदाहरति यथेति ॥ धूमवत्त्वे हेतौ ज्ञाने सपक्षे ज्ञानं ... निश्चयविषयवह्निमान् महानसः सपक्षो भवतीत्यर्थः ॥ = ३

विपक्षं दर्शयति निश्चितेति ॥ साध्यस्य अभावः साध्याभावः निश्चितश्चासौ साध्याभावो निश्चितसाध्याभावः सोऽस्यास्तीति निश्चितसाध्याभाववान् विपक्ष इत्यर्थः ॥ अभाववान् विपक्ष इत्युच्यमाने घटाभाववति भूतलेऽतिव्याप्तिः तद्वारणाय साध्याभाववानिति ॥ तावन्मात्रोक्ते ... व्याप्तिलक्षणाय निश्चितेत्यादि तथा च न दोषः ॥ २ ॥ उदाहरति ॥ यथेति ॥ धूमवत्त्वे हेतौ ज्ञाने ह्रदेव ह्रदो निश्चितो भवतीत्यर्थः ॥ = ५ ॥

उदाहरति यथेति ॥ धूमवत्त्वे हेतौ ज्ञाने विषयीभूते संदेह विषय [illegible] रूपसाध्यवान् पर्वतः ॥ पक्षो भवतीत्यर्थः ॥ = ४

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

प्रसंगाद्धेत्वाभासान्विभजते॥ सव्यभिचारेति॥ हेत्वाभासाः
पंच के ते सव्यभिचारबाधितांताः॥ तत्र हेतुवदाभासंत इति
हेत्वाभासाः॥ व्यभिचारः साध्याभाववद्वृत्तिः॥ तेन सहितः
सव्यभिचारः॥ ॥साध्यविरोधवान्विरुद्धः॥ ॥अव्याप्तिविरोधी
पक्षो यस्य स सत्प्रतिपक्षः॥ ॥आश्रयासिद्ध्यादिमानसिद्धः॥ ॥
बाधः साध्याभावः॥ स संजातोऽस्येति बाधितः॥ अत्र तद्धेतोर्वि
धेयः॥==॥१॥=॥ तत्र सव्यभिचारं विभजते॥ स इति॥ त्रै
विध्यं व्युत्पादयति साधारणेति॥ ४

तर्कसं.
१७
17

सव्यभिचारविरुद्धसत्प्रतिपक्षासि
द्धबाधिताः॥ पंच हेत्वाभासाः॥ सव्य
भिचारोऽनैकांतिकः॥ स त्रिविधः सा
धारणासाधारणानुपसंहारिभेदा

साधारणं निरूपयति तत्रेति॥ नैकांतिक

त्॥ तत्र साध्याभाववद्वृत्तिः॥ साधा

धिकरणे साध्येन ज्ञातो निश्चयो यस्य हेतोः स अनैकांतिक इत्यर्थः

रणोऽनैकांतिकः यथा पर्वतो वह्निमान् — उदाहरति यथेति
प्रमेयत्वादिति॥ प्रमेयत्वस्य वह्न्य
भाववति ह्रदे विद्यमानत्वात्॥ स

साध्यस्याऽभावः साध्याभावः॥ साध्याभावोऽस्यास्तीति साध्याभाववान् साध्याभाववति वृत्तिर्यस्य स साध्याभाववद्वृत्तिः॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

असाधारणं निरूपयति ॥ सर्वेति ॥ सपक्षाश्च विपक्षाश्च सपक्षविपक्षाः ॥ सर्वे च ते सपक्षविपक्षाश्च सर्वसपक्षविपक्षाः ॥ तेभ्यो व्यावृत्तो नाम भिन्नवृत्तिः सर्वस
पक्षविपक्षव्यावृत्त ईदृशो यो हेतुः स असाधारण इत्यर्थः ॥ हेतुरसाधारण उ
च्यमाने सद्धेतावतिव्याप्तिस्तद्वारणाय व्यावृत्त इति । तथापि सद्धेतावति
व्याप्तिस्तस्यापि कस्माच्चिद्भिन्नत्वात् ॥ तद्वारणाय विपक्षव्यावृत्त इति ।
तावदुक्ते केवलव्यतिरेकिण्यतिव्याप्तिस्तद्वारणाय सपक्षेति । सपक्ष
व्यावृत्त इत्युच्यमाने साधारणेऽतिव्याप्तिस्तद्वारणाय विपक्षव्यावृत्त इति
सर्वग्रहणेन कुत्रापि दोषः ॥ १ ॥ उदाहरति यथेति हि यतः शब्दत्वं नित्ये
भ्य आकाशादिभ्यो व्यावृत्तं तन्न वर्तते अनित्येभ्यो घटपटादिभ्यो व्यावृत्तं त

**वेसपक्षविपक्षव्यावृत्तः पक्षमात्र** त्रापि न वर्तते शब्दे तु वर्तते इति शब्दवृत्तिः ॥ २ ॥

**वृत्तिरसाधारणः ॥ यथा शब्दो नित्यः**

**शब्दत्वादिति शब्दत्वं हि सर्वेभ्यो नि**

**त्यानित्येभ्यो व्यावृत्तं शब्दमात्रवृ**

**त्तिः ॥ अन्वयव्यतिरेकदृष्टान्तरहितो** रहित इत्यर्थः ॥ हेतुरनुपसंहारी

उदाहरति यथेति

**नुपसंहारी यथा सर्वमनित्यं ॥ प्रमे** त्युक्तौ सद्धेतावतिप्रसं

**यत्वादिति अत्र सर्वस्यापि पक्षत्वा** गस्तद्वारणाय दृष्टान्तरहि त इति ॥ तावदुक्ते केवलव्यतिरेकिण्यतिव्याप्ति

**द्दृष्टान्तो नास्ति ॥ साध्याभावव्या** स्तद्वारणाय व्यतिरेकेति तावन्मात्रोक्तौ केवलान्व यिन्यतिव्याप्तिस्तद्वारणा यान्वयेति ॥ तावन्मात्रो क्तौ पुनः केवलव्यतिरेकि ण्यतिव्याप्तिरत उभयदल ॥ तथा च न कुत्रापि दोषः ॥ ॥ ३ ॥ ॥ ५ ॥

सत्प्रतिपक्षं निरूपयति ॥ साध्याभावेति ॥ साध्य
स्य अभावः साध्याभावः ॥ साध्याभावस्य साधकं
साध्याभावसाधकं यस्य हेतोः साध्यस्य अभाव
साधकं हेत्वंतरं नाम द्वितीयो हेतुर्विद्यते स हेतुः
सत्प्रतिपक्षः इत्यर्थः ॥ हेतुः सत्प्रतिपक्ष इत्युच्य
माने सद्धेतावति व्याप्तिः तद्वारणाय साध्याभावे
ति ॥ तावत्युक्ते विरुद्धेति व्याप्तिः तद्वारणाय हेत्वं
तरमिति निवेशः ॥ =॥ २ ॥ उदाहरति यथेति
यस्य श्रावणत्वस्य हेतोः साध्यस्य नित्यत्वस्य अ
भावः अनित्यत्वं तत्साधको द्वितीयो हेतुः का —

उदाहरति ॥ यथेति ॥ कृतकत्वं नाम कार्यत्वं नित्यत्वाभावेन अनित्यत्वेन व्याप्तं ॥ यत्र कार्यत्वं तत्र नित्यत्वाभाव इति सिद्धः ॥ = ॥ १ ॥ = ॥

णो हेतुर्विरुद्धः । यथा शब्दो नित्यः कृ
तकत्वादिति कृतकत्वं नित्यत्वाभा
वेन ॥ अनित्यत्वेन व्याप्तं ॥ साध्याभा
वसाधकं हेत्वंतरं यस्य स सत्प्रतिप
क्षः ॥ यथा शब्दो नित्यः ॥ श्रावणत्वात्
शब्दत्ववत् ॥ शब्दोऽनित्यः कार्यत्वा
त् ॥ घटवदिति ॥ असिद्धस्त्रिविधः ।
आश्रयासिद्धः ॥ स्वरूपासिद्धो व्याप्य

18

असिद्धं विभजते असिद्ध इति ॥ असिद्धिरस्यास्तीत्यसिद्धः ॥ स च त्रिविधः ॥ त्रयो विधाः प्रकारा यस्य इत्यर्थः ॥ = २

त्वे विध्यं मुत्पादयति आश्रयेति ॥ आश्रयस्य
असिद्धिः आश्रयासिद्धिः ॥ आश्रयासिद्धियुक्त
आश्रयासिद्धः ॥ हेतोः स्वरूपस्य
पक्षे असिद्धिः स्वरूपासिद्धिः ॥ सा अस्यास्तीति स्व
रूपासिद्धः ॥ व्याप्तेः अयोग्यतायाः भावो व्याप्य
त्वं व्याप्यत्वस्य असिद्धिः व्याप्यत्वासिद्धिः सा अस्य
अस्तीति व्याप्यत्वासिद्धः ॥

[illegible]
[illegible]
[illegible]

आश्रयासिद्ध इत्यत्र हरति आश्रयासिद्धो यथेति॥ ==१॥

त्वासिद्धश्चेति॥ आश्रयासिद्धो यथा

यागगनारविंदं सुरभि अरविंदत्वा

त्सरोजारविंदवदिति॥ अत्र गगना

रविंदमाश्रयः स च नास्त्येव॥ स्वरू

पासिद्धो यथा शब्दो गुणः॥ चाक्षुषत्वादि

ति॥ अत्र चाक्षुषत्वं शब्दे नास्ति शा

ब्दस्य श्रावणत्वात्॥ सोपाधिको हे

तुर्व्याप्यत्वासिद्धः साध्यव्यापकत्वे

व्याप्यत्वासिद्ध इति रूपत्र
ति॥ सोपाधक इति॥
उपाधिरेव उपाधिकः
उपाधिकेन सहितः
सोपाधिकः॥ सोपा
धिको हेतुर्व्याप्यत्वा
सिद्धः॥ आर्द्रेन्धन
व्याप्यधूमाववह्नि
त्वसंबंधेनार्द्रेन्ध
नोपाधिविशिष्टोव
ह्नि व्याप्यत्वासिद्धि
रित्यर्थः॥ —२

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

त्यंता

साध्यव्यापकत्वं लक्षयति॥ साध्येति॥ साध्यस्य समानं अधिकरणं यस्य स साध्यसमानाधिकरणः॥ साध्याधिकरणवृत्तिः तद्वा सात्यंताभावः साध्याधिकरणवृत्त्यत्यंताभावस्तस्य प्रतियोगि साध्याधिकरणवृत्त्यत्यंताभावप्रतियोगि॥ तस्य भावस्तत्त्वं तदेव साध्यव्यापकत्वं॥ यथा धूमाधिकरणे पर्वतादौ वृत्तिर्योऽत्यंताभावो घटाद्यत्यंताभावस्तत्प्रतियोगी घटादिः प्रतियोगी आर्द्रेंधनसंयोग उपाधिरित्यर्थः॥ घटात्यंताभावप्रतियोगी पटस्तत्रातिव्याप्तिवारणाय वृत्तीति॥ तदपि तत्रैव तद्वारणाय साध्याधिकरणेति॥ तथा च न तत्रातिव्याप्तिरिति॥ १-२॥

नं. १९

19

सति साधनाव्यापकत्वे उपाधिः॥ साध्यसमानाधिकरणात्यंताभावाप्रतियोगित्वं साध्यव्यापकत्वं॥ साधनवन्निष्ठात्यंताभावप्रतियोगित्वं साधनाव्यापकत्वं॥ पर्वतो धूमवान्वह्निमत्वादित्यत्र॥ आर्द्रेंधनसंयोग उपाधिः॥ यत्र धूमस्तत्र आर्द्रेंधनसंयोग इति साध्यव्यापकता

साधनाव्यापकत्वं निरूपयति साधनेति॥ साधनमस्यास्तीति साधनवान्॥ साधनवति निष्ठा यस्य स साधनवन्निष्ठः साधनवन्निष्ठश्चासौ अत्यंताभावश्च साधनवन्निष्ठात्यंताभावः॥ तस्य प्रतियोगी साधनवन्निष्ठात्यंताभावप्रतियोगी तस्य भावस्तत्त्वं साधनाव्यापकत्वं॥ समानाधिकरणवृत्त्यंत

ताभावप्रतियोगित्वे॥ यः समानाधिकरणं तन्निष्ठो गोलकं॥ तस्मिन्वह्निरत्यंताभावः आर्द्रेंधनसंयोगस्य॥ तत्प्रतियोगी आर्द्रेंधनसंयोगस्तदेव साधनाव्यापकत्वमित्यर्थः॥ प्रतियोगित्वमात्रोक्तौ सर्वत्रातिव्याप्तिः॥ सर्वत्र स्वस्वसंबंधादिप्रतियोगित्वात्॥ पुनरप्यतिव्याप्तिः एवं स्वस्यैव वृत्त्यत्यंताभावेति॥ तदपि घटादावतिप्रसंगस्तद्वारणाय साधनाधिकरणेति॥ तथा च वह्न्यधिकरणं तप्तायःपिंडवृत्तिरार्द्रेंधनसंयोगात्यंताभावप्रतियोगित्वमार्द्रेंधनसंयोगो भवत्येवेति॥ २-३

॥यत्रवह्निस्तत्रआर्द्रेंधनसंयोगोना
स्ति॥यथायोगोलके आर्द्रेंधनसं
योगाभावः॥एवंसाध्यव्यापकत्वेस
तिसाधनाव्यापकत्वात्॥आर्द्रेंधन
संयोगउपाधिः सोपाधिकत्वान्व
ह्निमत्त्वंव्याप्यत्वासिद्धं॥पक्षसाध्या
भावः॥प्रमाणान्तरेणनिश्चितःसबा
धितः॥यथावह्निरनुष्णः॥द्रव्यत्वादि

स्वव्याप्यसाध्याभाववद्वृत्तित्वरूपोपाधिकत्वा
द्वह्निमत्वे व्याप्यत्वा
सिद्धम्॥

बाधितं लक्षयति॥
पक्षेति॥ साध्यस्य
अभावः साध्याभावः
पक्षे हेतोः साध्याभावः
प्रमाणेन निश्चयवि
षयः स हेतुर्बाधित इ
त्यर्थः॥ तथाच प्र
माणसिद्धसाध्या
भाववैशिष्ट्यपक्षकहेतुर्बाधितः
हेतुर्बाधितस्तु व्यभिचारेऽहेतुत्वा
दिव्याप्तिज्ञानप्रतिबन्धकत्वात्
ति॥ पुनरपि सद्धेतावतिव्याप्तिः
द्वारणाय साध्याभाववैशिष्ट्येति
पक्षविशेषणं॥ तथापि साध्या
ऽतिव्याप्तिवारणाय प्रमा
सिद्धेति साध्याभावविशेषणं॥ त
थाच पक्षनिष्ठः॥ ==३॥

श्रीरामरामरघुनंदनरामराम
श्रीरामरामभरताग्रजरामराम
श्रीरामरामरणकर्कशरामराम

नं. २.
२०

ति॥ अथ ज्ञानस्य त्वं साध्यमदृष्मावउस्य
त्वं स्पर्शेन प्रत्यक्षेणागृह्यते॥ इति वा
धितत्वं व्याख्यानमनुमानं उपमानं।
निरूपयति॥ उपमितिकरणं उपमा
नं॥ संज्ञासंज्ञिसंबंधज्ञानं उपमितिः
तत्करणं सादृश्यज्ञानं॥ तथा हि क
श्चित् गवयशब्दार्थमजानन्॥ क्व
चित्पुरुषात्॥ गोसदृशो गवय।

उपमितेः करणमुपमानं भवतीत्यर्थः निरूपयति॥

उदाहरति॥ तथा हीति॥

वनवासिनः

नन्रूपमानलक्षणप्रविष्टायाउपमितिः सा केति जिज्ञासा
यामुपमितिलक्षयति॥ संज्ञेति॥ संज्ञा च संज्ञि च संज्ञास
ज्ञिनौ तयोः संबंधः संज्ञासंज्ञिसंबंधः॥ तस्य ज्ञानं उपमितिः
नामार्थयोर्वाच्यवाचकभावसंबंधज्ञानमुपमितिः॥
यागवयो गवयपदवाच्य इति॥ ज्ञानमित्युक्तौ प्रत्यक्षादाव
तिव्याप्तिवारणाय संबंधेति॥ तावन्मात्रोक्तौ घटसंबंधज्ञा
नकपालमात्रातिव्याप्तिवारणाय संज्ञासंज्ञीति॥ इति
नैयायिकः॥ ==४॥

उपमितेः करणमितिल [illegible] उपमानमिति
[illegible] सादृश्यज्ञा
[illegible]
[illegible] करणे [illegible]
[illegible] वारणाय
मितौ [illegible] मितिरीत्यं
नं करणं [illegible]
[illegible] वारणाय
णाय॥ उपमितौ ति॥
उपमितिरित्युक्तौ
[illegible] वारणाय
[illegible]
नन्वेतेषाः॥ ४॥

काष्ठिन
नागरिक

स्मरित्यन् इत्यर्थः ॥

इति श्रुत्वा वचनं गतो वाक्यार्थस्मर

सप्तमतः पश्यतितिदनंतरं स्मरति ॥

न् ॥ गो सदृशं पश्यति तदनंतरं ॥ ग

अतिदेशवाक्यार्थस्मरणा नंतरमित्यर्थः ॥ तेन तुल्यमतिदेशः ॥

वयो गवयश्शब्दवाच्य इत्युपमिति

सादृश्यज्ञानं करणं अतिदेशवाक्यार्थस्मरणं व्यापारः ॥ गवयो गवयपदवाच्य इत्याकारकोपमितिः फलम् ॥ = ३

रुत्पद्यते ॥ आप्तवाक्यं शब्दः ॥ आप्त

आप्तलक्षणमाह ॥ आप्तस्त्विति ॥ यथार्थवक्तेति यथार्थवक्ता आप्त इत्यर्थः ॥ वक्तुरित्युच्चमाने भ्रांतपुरुषेऽतिव्याप्तिलक्षणपर्याप्तं ॥ नाव लक्षे पिमतपुरुषेऽतिव्याप्तिलक्षणपपकेत्यपि ॥ समस्तपदोक्तौ न दोषः ॥ = ५ ॥

स्तु यथार्थवक्ता वाक्यं पदसमूहः

वाक्यलक्षणमाह ॥ वाक्यमिति ॥ पदानां परस्परं वा समूहः पदसमूह इत्यर्थः ॥ समूहो वाक्यमित्युक्ते घटादिपदार्थसमूहेऽतिव्याप्तिलक्षणा ॥ पदेति ॥ नाव मात्रोक्तौ एकस्मिन्पदेऽतिव्याप्तिलक्षणा ॥ पदसमूह इति ॥ समस्तोक्तौ न दोषः ॥ = ४ ॥

यथा गामानयेत्युक्तं दंडेनेति ॥ श

क्तं पदं ॥ अस्मात्पदादयमर्थो बोद्ध

व्य इति ईश्वरसंकेतः शक्तिः ॥ श

पदं निरूपयति ॥ शक्तमिति ॥ निरूपकतासंबंधेन यत्र शक्त्यधिकरणं तत्पदमित्यर्थः ॥ शक्त्यधिकरणमित्युक्तौ पदार्थेऽतिव्याप्तिः पदार्थस्यापि निरूपकतासंबंधेन शक्तिमत्वात् ॥ अतस्तद्वारणाय निरूपकतेति तथा च न दोषः ॥ २ ॥ = ॥ शक्तिस्वरूपमाह अस्मादिति ॥ इदं पदोच्चरपंचम्याऽर्थोऽर्थः ॥ पदोच्चरपंचम्याः जन्यत्वमर्थः ॥ बोद्धव्य इति पदस्य बोधविषयोऽर्थः ॥ उपात्तिति पदजन्यबोधविषयोऽयमर्थः ॥ इतीश्वरसंकेतः शक्तिरित्यर्थः ॥ यथा घटपदजन्यबोधविषयो घटपदार्थ इत्यर्थः ॥ = २ ॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

आकांक्षां निरूपयति॥ पदस्येति॥ न अनुभावको अननुभावकः॥ अन्वयस्याऽननुभावको अन्वयाननुभावकः। तस्य भावस्तत्त्वं॥ अन्यत्पदं पदांतरं॥ पदांतरस्य व्यतिरेकः पदांतरव्यतिरेकः॥ पदांतरव्यतिरेकेण प्रयुक्तं॥ पदांतरव्यतिरेकप्रयुक्तं॥ च तत् अन्वयाननुभावकत्वं॥ पदांतरव्यतिरेकप्रयुक्तान्वयाननुभावकत्वं॥ यत्पदस्य यत्पदांतराभावप्रयुक्तं यदन्वयबोधाजनकत्वं तत्पदस्य तत्पदसाकांक्षत्वम्॥ यथा घटमिति पदस्य आनयपदांतराभावप्रयुक्तं घटकर्मकानयनानुकूलं कृतिमान् त्वमित्याकारकान्वयबोधाजनकत्वं॥ घटमिति पदस्याऽनयेतिपदसाकांक्षत्वम्॥ अन्वयाननुभावकत्वमित्युक्तौ आकांक्षारहिते पदेऽतिव्याप्तिस्तद्वारणाय पदांतरेत्यादि॥ तथापि तत्रैवातिव्याप्तिवारणाय यदिति॥ घटमिति पदं घटमाऽऽनयेतिपदांतराभावप्रयुक्तमन्वयबोधकत्वमिति तत्रातिव्याप्तिः स्यात्तद्वारणाय प्रकारेणतात्पर्यज्ञानमपि हेतुर्बोध्यः
पत्यपदस्येति॥ तथाचेत • त्पदे ... ऽपि

पाकेऽद्योऽस्तोन दोषः

आकांक्षायोग्यतासंनिधिश्च वाक्यार्थ-

ज्ञाने हेतुः॥ पदस्य पदान्तरव्यतिरे-

कप्रयुक्तान्वयाननुभावकत्वमा-

कांक्षा॥ अर्थाबाधो योग्यता॥ पदा-

नामविलंबेनोच्चारणं संनिधिः॥

नन्वाकांक्षस्य प्रमाणत्वं स्यात्॥ अनाकांक्षा वा केन निश्चीयते॥ अतआकांक्षादीति॥ आकांक्षाआदिर्येषां

आकांक्षादिरहितं वाक्यमप्रमा-

नहि गौरश्वो भवति

णं॥ यथा गौरश्वः पुरुषो हस्तीति

न प्रमाणं सर्वमेव प्रमाणं लौकिकं

आकांक्षाभावात्   आनिकरणकसेकानुकूलकृतिमानित्यर्थः

न प्रमाणं आकांक्षाविरहात्॥ अग्निना सिंचे-

दिति न प्रमाणं योग्यताविरहात्॥ प्रहरे प्रह-

रे असहोच्चारितानि गामानयेत्यादिपदानि

न प्रमाणं॥ संनिध्यभावात्॥ वाक्यं द्विवि-

धं वैदिकं लौकिकं चेति वैदिकं सर्वमेव ईश्वरोक्तिः १

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

त्वाप्तोक्तं प्रमाणं अन्यदप्रमाणं

वाक्यार्थज्ञानं शाब्दज्ञानं ॥ तत्कर

णं शब्दः ॥ यथार्थानुभवो निरूपि

अयथार्थानुभवं विभजते अयथार्थेति ॥

तः ॥ अयथार्थानुभवस्त्रिविधः ॥ सं

शयविपर्ययतर्कभेदात् ॥ एकस्मि

न्धर्मिणि विरुद्धनानाधर्मवैशि

उदाहरति यथेति

ष्ट्यज्ञानं संशयः ॥ यथा स्थाणुर्वा

विपर्ययलक्षणमाह ॥ मिथ्येति ॥ तदभाववति तत्प्रकारक मित्यर्थः ॥

पुरुषो वेति ॥ मिथ्याज्ञानं विपर्ययः

संशयं निरूपयति एकस्मिन्निति ॥ नानाचते धर्मा नानाधर्मा विरुद्धाश्च ते नाना
धर्मा विरुद्धनानाधर्माः विरुद्धनानाधर्माणां वैशिष्ट्यं तस्य ज्ञानं संशय इत्यर्थः ॥
ज्ञानं संशय इत्युक्ते यथार्थज्ञानेऽतिव्याप्तिवारणाय वैशिष्ट्येति ॥ वैशिष्ट्यज्ञा
नं संशय इत्युक्तेपि तत्रैवातिव्याप्तिवारणाय धर्मेति ॥ धर्मवैशिष्ट्यज्ञानं संश
य इत्युक्ते यथार्थानुभवेऽतिव्याप्तिवारणाय नानेति ॥ तथापि घटो द्रव्यं पृथि
वीति ज्ञानेऽतिव्याप्तिवारणाय विरुद्धेति ॥ तथापि घटपटाविति समूहालंब
नेऽतिव्याप्तिवारणाय एकस्मिन्निति ॥ == ५१ ॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

तर्कलक्षणमाह॥ व्याप्येति॥ व्याप्यश्चासौ व्याप्यः॥ व्याप्यस्याऽऽरोपो व्याप्यारोपः तेन व्याप्यारोपेण व्याप्तिनिरूपकं व्यापकं व्यापकस्यारोपो व्यापकारोपः स तर्क इत्यर्थः॥ व्याप्यारोपश्च स्वीक्रियमाणे वह्निर्न स्यादेतावति ज्ञानेऽपि व्याप्तिस्व द्वारण यद्व्यापकेति॥ व्यापकारोपश्चैतावत्स्वीक्रियमाणे धूमोऽपि न स्यादेतावति ज्ञानेऽपि व्याप्तिस्व द्वारण यद्व्याप्येति॥ =१॥ उदाहरति यथेति॥ व ह्न्यभावो व्याप्यो धूमाभावो व्यापकस्तदारोपस्यात्रसत्वादर्पत्त इत्यर्थ

नं. २२
22

उदाहरति॥ यथेति॥ रजतत्वाभाववत्यां शुक्तौ रजतत्वप्रकारकं मित्यर्थः॥ =१॥

यथा शुक्ताविदं रजतमिति धीः।

प्यारोपेण व्यापकारोपस्तर्कः

यथा यदि वह्निर्न स्यात्॥ तर्हि धू

स्मृतिं विभजते स्मृतिरिति॥

मोऽपि न स्यादिति स्मृतिरपि द्विधा

द्वैविध्यं व्युत्पादयति यथार्थेत्यादि

यथार्थायथार्था च॥ प्रमाजन्या

यथार्था॥ अप्रमाजन्याऽयथार्था

सर्वेषामनुकूलवेदनीयं सुखं प्र

तिकूलवेदनीयं दुःखं इच्छाका

यथार्थस्मृतिं निरूपयति प्रमाजन्येति॥ प्रमायथार्थत्वस्वीक्रियमाणे स्मृत्योऽसंभवः यथार्थानुभवेऽति व्याप्तिस्व द्वारण यजन्येति॥ तावत्युक्ते घटादावति व्याप्तिस्व द्वारणाय प्रमेति॥ =२ अयथार्थां निरूपयति अप्रमेति अप्रमाऽयथार्थेत्युच्यमानेऽलक्ष्येऽसंभवः अयथार्थानुभवेऽति व्याप्तिस्व द्वारणाय जन्येति तावत्युच्यमाने घटादावति व्याप्तिस्व द्वारणाय प्रमेति॥ =३॥

सुखं निरूपयति॥ सर्वेषामिति॥ वेदनीयं सुख मित्युक्ते दुःखेऽति व्याप्तिस्व द्वारणायानुकूलेति॥ कदाचित्कस्यचित्कुत्रचिद्दुःखमप्यनुकूलं भवत्यतो दुःखेऽति व्याप्तिस्व द्वारणाय सर्वेषामिति॥ =२॥ दुःखं निरूपयति प्रति कूलेति॥ वेदनीयं दुःखमित्युक्ते सुखेऽति व्याप्तिस्व द्वारणाय प्रतिकूलेति॥ =३॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

धर्मं निरूपयति । विहितेति ॥ विहितं च तत् कर्म विहितकर्म तेन जन्यो
विहितकर्मजन्यः ॥ धर्म इत्यर्थः ॥ जन्यो धर्म इत्युच्यमाने घटादावति
प्रसंगवारणाय कर्मेति ॥ तावन्मात्रोक्ते पापे तिव्याप्तिवारणाय विहि
तेति ॥ विहितकर्मेत्युक्ते तद्ध्वंसे प्रवः कर्मण्यतिव्याप्तिवारणाय
जन्येति ॥ = ९ ॥ अधर्मं निरूपयति निषिद्धेति ॥ निषिद्धं च तत् कर्म नि
षिद्धकर्म तज्जन्योऽधर्म इत्यर्थः ॥ जन्योऽधर्म इत्युक्तौ घटादावतिप्र
संगवारणाय कर्मेति ॥ तावन्मात्रोक्ते धर्मे तिव्याप्तिवारणाय निषिद्धेति
निषिद्धकर्मेत्येतावन्मात्रोक्तौ तद्ध्वंसे प्रवः कर्मण्यतिव्याप्तिवारणाय ज
न्येति ॥

मः ॥ क्रोधो द्वेषः कृतिः प्रयत्नः ॥ वि-

हितकर्मजन्यो धर्मः निषिद्धकर्म-

आत्मेतरागुणत्वे इति

जन्यस्त्वधर्मः ॥ बुद्ध्यादयो ऽष्टावात्म-

आत्मगुणाः ॥

मात्रगुणाः ॥ बुद्धीच्छाप्रयत्ना नि-

त्या अनित्याश्च नित्या ईश्वरस्य ॥ अ-

आत्मेतरावृत्तित्वे सति आत्मवृत्तित्व
मात्मपात्रवृत्तित्वमित्यर्थः ॥

नित्या जीवस्यैषामात्ममात्रवृत्तयः

जैविष्वंसुत्पादयति ॥ ते इति

संस्कारस्त्रिविधः ॥ वेगो भावना स्थि-

तिस्थापकश्चेति वेगः ॥ पृथिव्यादि-

पृथिवीत्यादि । पृथिव्यादि पृथिव्यादि च तत् चतुष्टयं पृथिव्यादिचतुष्टयं
पृथिव्यादिचतुष्टयं च मनश्चेति ते ॥ तयोर्वृत्तिर्यस्य सः पृथिव्यादिचतुष्टयम
नोवृत्तिरित्यर्थः ॥ मनोवृत्तिरित्युक्तौ मनस्त्वादावतिव्याप्तिवारणाय
पृथिव्यादीत्यादि ॥ पृथिव्यादिचतुष्टयवृत्तिरित्युक्तौ स्पर्शेऽतिव्याप्तिवा
रणाय मनोवृत्तिरिति ॥ तथापि संख्यायामतिव्याप्तिवारणाय संस्का
रत्वे सतीति विशेषणम् ॥ = १ ॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative.

भावनां लक्षयति॥ अनुभवेति॥ अनुभवेन जन्या अनुभवजन्या या स्मृतिहेतुः स्पष्टार्थः॥ यद्यप्ययं घटः इत्यनुभवजन्या सा घटस्मृतिहेतुर्भवतीति लक्षणसमन्वयः॥ हेतुरित्युक्तौ ध्वंसे अतिव्याप्तिवारणाय स्मृतीति॥ तावन्मात्रोक्तौ आत्मनि अतिव्याप्तिवारणाय अनुभवेत्यादि॥ अनुभवजन्येत्युक्तौ अनुभवध्वंसे अतिव्याप्तिवारणाय स्मृतिहेतुरपीति॥ = ९॥

न० २३

23

स्थितिस्थापकं निरूपयति अन्यथेति॥ पूर्वस्थितिरूपेण अन्यप्रकारेण कृतस्य स्थापितस्य पुनः पूर्वावस्थापादकः संस्कारः स्थितिस्थापक इत्यर्थः॥ = ३॥

चलत्वमनोवृत्तिः॥ अनुभवजन्या स्मृतिहेतुर्भावनाख्यात्ममात्रवृत्तिः॥ अन्यथाकृतस्य पुनस्तदवस्थापादकः स्थितिस्थापकः कटादिवृत्तिः॥ चलनात्मकं कर्म ऊर्ध्वदेशसंयोगहेतुरुत्क्षेपणं॥ अधोदेशसंयोगहेतुरपक्षेपणं॥ शरीरसंनिकृष्टसंयोगहेतुराकुंचनं॥ विप्रकृ

कटादिरित्यादिना [illegible] स्वादिवृत्ति [illegible]

कर्मलक्षणं निरूपयति चलनेति॥ चलनस्य आत्मा स्वरूपं यस्य तत् चलनात्मकं कर्मेत्यर्थः॥ = ४॥

उत्क्षेपणं निरूपयति॥ ऊर्ध्वेति॥ ऊर्ध्वश्चासौ देशश्च ऊर्ध्वदेशः तस्य संयोगस्य हेतुः उत्क्षेपणमित्यर्थः॥ हेतुरित्युक्तौ कुलालादावतिव्याप्तिवारणाय संयोगेति॥ तावन्मात्रोक्तौ कर्मण्यतिव्याप्तिवारणाय देशेति॥ तथापि गतावतिव्याप्तिवारणाय ऊर्ध्वेति॥ = ५॥

अपक्षेपणं लक्षयति॥ अधरेति॥ अधश्चासौ देशश्च अधोदेशः तस्य संयोगस्य हेतुरपक्षेपणमित्यर्थः॥ हेतुरित्युक्तौ कुलालादावतिव्याप्तिवारणाय संयोगेति॥ तावन्मात्रोक्तौ उत्क्षेपणेतिव्याप्तिवारणाय अधोदेशेति॥ तथापि गतावतिव्याप्तिवारणाय अधरेति॥ = ६॥ आकुंचनं लक्षयति॥ शरीरेति॥ संनिकृष्टेन संयोगः संनिकृष्टसंयोगः शरीरस्य संनिकृष्टसंयोगः शरीरसंनिकृष्टसंयोगः॥ तस्य हेतुराकुंचनमित्यर्थः॥ हेतुरित्युक्तौ कुलालादावतिव्याप्तिवारणाय संयोगेति॥ तथापि कपालद्वये अतिव्याप्ति

[illegible]

प्रसारणं संजयति ॥ ...क्रकत्वेति ॥ विप्रकृष्टेन संयोगोत्पत्ति ॥ द्रष्टसंयोगः स
स्वदेहः प्रसारणमित्यर्थः ॥ हेतुरित्युक्तौ वेमादावतिप्रसंगस्तद्वारणाय सं
योगे सतिवत्युक्ते पदोपणादावतिप्रसंगस्तद्वारणाय विप्रकृष्टेति ॥ = १
भ्रमणरेचनागमनं ऊर्ध्वज्वलनादित्यभिप्रेत्योक्तं अन्यदिति ॥ = ॥ = = १ ॥
सामान्यलक्षणमाह नित्यमिति ॥ अनेकेषु अनुगतं समवेतमित्यर्थः ॥ एकस्मि
न् सामान्यद्वयरूपकथनं नटलक्षणं प्रविष्टमिति नित्यत्वे सत्यनेकसमवे
तं सामान्यमित्यर्थः ॥ परमाण्वादिः समवेतं सामान्यमित्युक्तौ रूपादावतिव्या
प्तिस्तद्वारणायानेकेति ॥ तावत्युक्ते संयोगादावतिप्रसंगस्तद्वारणाय
नित्येति ॥ नित्यं सामान्यमित्युक्तौ परिमाणादावतिव्याप्तिस्तद्वारणाय
विशेषणदलं ॥ अनेकसंबंधमित्युक्तौ घटात्यंताभावेऽतिप्रसंगस्तद्वार
णाय समवेतमिति ॥ अपरसामान्यं ... स्वदेशवृत्तिसामान्यं द्रव्य

षसंयोगहेतुः प्रसारणं अन्यत्स
र्वं गमनं नित्यमेकमनेकानुगतं सा
मान्यं द्रव्यगुणकर्मवृत्ति ॥ परं स
त्तापरं द्रव्यत्वादि ॥ नित्यद्रव्यवृत्त
यो व्यावर्तका विशेषाः ॥ नित्यसं
बंधः समवायः अयुतसिद्धवृत्तिः ॥ प
योर्मध्ये एकमविनश्यदपराश्रित
मेवावतिष्ठते तावयुतसिद्धौ ॥

समवायलक्षणमाह अयुतेति ॥ अयुतौ चैतौ सि
द्धौ च अयुतसिद्धौ तयोर्वृत्तिर्विशिष्टतया इत्यर्थः = = २

त्वादि सामान्यमित्यर्थः = २ ॥
परं सामान्यं अधिकदेश
वृत्तिसामान्यं सत्ता सा
मान्यमित्यर्थः ॥ = ३
नेदानीं विशेषमाह द्रव्येति ॥
द्रव्यं च गुणश्च कर्म च
द्रव्यगुणकर्माणि तेषु वृ
त्तिर्यस्य तत्तथेत्यर्थः = ३
विशेषलक्षणमाह नित्ये
ति ॥ नित्यानि च तानि द्र
व्याणि नित्यद्रव्याणि
पृथ्व्यादि चतुष्टयप
रमाणुआकाशादीनि ।
केवलं तेषु वृत्तिर्येषां ते नि
त्यद्रव्यवृत्तयः ॥ व्यावर्त
का इत्यस्य स्वेतरव्यावर्त
का इत्यर्थः ॥ इतरभेदसाधका इति ज्ञा
नकत्वं स्वस्यैवेत्यर्थः ॥
यथा अग्ने विशेषाद्भिन्ने
ष्वाभिधते विशेषाः ॥ ४
समवायलक्षणमाह नित्येति
नित्यसंबंधश्च संबंधिभिन्नः
संबंधः तथा च नि
त्यत्वे सति संबंधत्वं समवा
यत्वमित्यर्थः ॥ संबंधमित्यु
क्तौ संयोगेऽतिव्याप्ति लक्षणा
रणाय नित्येति ॥ तावन्मात्रे
परमाण्वादावतिव्याप्तिस्तद्वार
णाय संबंध इति = = ।

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

प्रत्यभावं लक्षयति॥ अनादिरिति॥ अनादिरित्युक्ते आकाशादावतिव्याप्तिस्तद्वार[illegible]णाय सांत इति॥ तावन्मात्रोक्तौ घटादावतिप्रसंगस्तद्वारणाय॥ घटः॥ प्रागभावे प्रमाणं च कपाले घटो भविष्यतीति प्रतीतिरेवेति॥ = ३॥ उदाहरति उत्पत्तेरिति कार्यस्य घटादेः उत्पत्तेः पूर्वं यः अभावः प्रागभाव इत्यर्थः॥ = ४॥ [illegible] ध्वंसं लक्षयति सादिरिति॥ सादिरित्युक्ते घटादावतिव्याप्तिस्तद्वारणायानंतरिति॥ तावन्मात्रोक्तौ परमाण्वादावतिव्याप्तिस्तद्वारणाय सादिरपि॥ ध्वंसे प्रमाणं॥ ध्वस्तो घटो नष्टो घट इत्यादिप्रतीतिरेवेति॥ = ४॥ उदाहरति॥ उत्पत्तीति॥ कार्यस्य घटादेरुत्पत्तेरनंतरं मुद्गरप्रहारादिना यो भावः स ध्वंस इत्यर्थः॥ ५॥ [illegible]त्यंताभावं लक्षयति॥ त्रैकालिक इति॥ त्रिषु कालेषु भवतीति त्रैकालिकः नित्य इत्यर्थः [illegible] [illegible]संसर्गावच्छिन्नाप्रतियोगिताकस्य संसर्गावच्छिन्नप्रतियोगिताकः॥ संसर्गो नाम संबंधः॥ त्रैकालिकश्चासौ संसर्गावच्छिन्नप्रतियोगिताकः॥ नित्यसंबंधाव-

२५ नं॰ २५ च्छिन्नप्रतियोगि

वयवावयविनोः॥ गुणगुणिनोः॥ क्रि-

याक्रियावतोः॥ जातिव्यक्त्योः॥ विशेष-

नित्यद्रव्ययोश्चेति॥ अनादिः सांतः प्रा-

गभावः॥ उत्पत्तेः पूर्वं कार्यस्य॥ सादि-

रनंतः॥ प्रध्वंसः॥ उत्पत्त्यनंतरं कार्य-

स्य॥ त्रैकालिकसंसर्गावच्छिन्नप्रति-

योगिताकोऽत्यंताभावः॥ यथा भूत-

ले घटो नास्तीति॥ तादात्म्यसंबंधा-

ताकः॥ इत्यर्थः॥ अभावोऽत्यंताभाव इत्युक्तेऽन्योन्याभावादावतिव्याप्तिस्तद्वारणाय संबंधावच्छिन्नेत्यादि नत्यादिप्रागभावादावतिव्याप्तिस्तद्वारणाय नित्येति नित्यत्वं चाकाशादावतिव्याप्तिस्तद्वारणाय संसर्गेत्यादि॥ एतदन्यान्योन्याभावेऽतिव्याप्ति[illegible]रिति चे[न्न] संबंधपदस्य संयोगरूपकालपदार्थकत्वात् अन्योन्याभावस्य संबंधावच्छिन्नप्रतियोगिताकत्वादिति दिक्॥ ६॥

उदाहरति॥ यथेति॥ भूतलादिकरणके संयोगसंबंधावच्छिन्नघटत्वावच्छिन्नप्रतियोगिताकघटात्यंताभावोऽभावीयदेशिकविशेषणतासंबंधेन वर्तत इत्यर्थः॥ ७॥ २॥ ८॥

अन्योन्याभावं लक्षयति तादात्म्येति॥ संबंधावच्छिन्नप्रतियोगिताकोऽभावोऽन्योन्याभावः इत्युक्तेऽत्यंताभावादावतिव्याप्तिस्तद्वारणाय संबंधेत्यादि॥ ना[illegible]स्य केवलत्रैकालिकात्यंताभावादावतिव्याप्तिस्तद्वारणाय तादात्म्येति॥

॥ उदाहरति॥ यथेति॥ स्वरूपसंबंधावच्छिन्नपटत्वावच्छिन्नप्र
तियोगिताकोऽन्योन्याभावानुयोगि घट इत्यर्थः॥ = = ॥ २॥
नु प्रमाण प्रमेयादि प्राचीनसूत्रे षोडशपदार्थानामुक्तत्वा
त्कथं सप्तैव पदार्था इत्यत आह सर्वेषामिति॥ प्रमाणस्येन्द्रि
यादिद्रव्यादावंतर्भावः॥ आत्मादिरूपस्य प्रमेयस्य द्रव्यादा
वंतर्भावः। संशयस्य गुणेऽन्तर्भावः॥ प्रयोजनस्य गुणादा
वंतर्भावः॥ दृष्टांतस्य द्रव्यादावंतर्भावः॥ सिद्धान्तस्य गुणादे

25

वह्निव्यप्रतियोगिताकोन्यान्याभा
वः यथा घटः पटो न भवतीति॥ स
र्वेषामपि पदार्थानां यथायथोक्ते
ष्वंतर्भावात्सप्तैव पदार्था इति
सिद्धं काणादन्यायमतयोर्बाल
व्युत्पत्तिसिद्धये॥ अन्नंभट्टेन विदुषा
रचितस्तर्कसंग्रहः॥ १॥ इति तर्कसं
ग्रहः समाप्तेति शुभं भूयात्सर्वं ज॥

ऽवयवानां गुणे॥ तर्कनिर्णययोर्गु
णे॥ वादजल्पवि
तंडानां गुणे॥ हेत्वा
भासानां द्रव्या
दौ॥ छलस्यापि गुणे॥ निग्रह
स्थानानामभावे
द्रव्यादौ चांतर्भावः
एवमंतर्भावात्स
प्तैव पदार्था इति
सिद्धं॥ = = ॥ २॥

काणादस्य न्यायस्य नो॥ तयोर्मतयोर्बालानां व्युत्पत्तिः बालव्युत्पत्ति-
तस्याः सिद्धिर्बालव्युत्पत्तिसिद्धिः तस्यै इत्यर्थः॥ = ४॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

CC-0 Panjab University Chandigarh. An eGangotri Vaidika Bharata Initiative

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

तर्कसंग्रहः

ترک سنگره در علم منطق

२०६

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative